दिनाङ्कः-21.12.2025

प्रातः - 06:55

प्रधानमन्त्री-असम

प्रधानमन्त्री नरेन्द्रमोदी अद्य असम-राज्यस्य नामरूप-नगरे द्वादशसहस्रकोटि-रूप्यकाणां अमोनिया-यूरिया-उर्वरक-परियोजनायाः भूमि-पूजनं करिष्यति। सः नामरूप-नगरे जनसभाम् अपि सम्बोधयिष्यति। राज्यस्य यात्रायाः द्वितीये दिने, श्री मोदी, ब्रह्मपुत्रानद्याः उपरि क्रूज-नौकायां स्वस्य परीक्षा पे चर्चा इत्येतस्मिन् कार्यक्रमे विद्यालयानां पञ्चविंशति छात्रैः सह संवादं करिष्यति। ततः परं प्रधानमन्त्री असम-आन्दोलनस्य षष्ठ्योत्तरअष्टशतं यावत् हुतात्म-वीरानां स्मरणे निर्मितं गुवाहाटी-नगरस्य पचिम-बोरागाव-इत्यत्र नवनिर्मितं हुतात्म-स्मारक-क्षेत्रं गमिष्यति। श्वः प्रधानमन्त्रिणा गुवाहाटी-नगरस्य लोकप्रिय-गोपीनाथ-बारदोलोयी-अन्ताराष्ट्रिय-विमानस्थानके अत्याधुनिकं नवनिर्मितं नूतनं टर्मिनल-भवनम् उद्घाटितम्। सः विमानस्थानके असम-राज्यस्य पूर्वमुख्यमन्त्रिणः गोपीनाथ-बारदोलोयी वर्यस्य प्रतिमायाः अनावरणम् अपि कृतवान्। प्रायः चत्वारि-दशमलवोत्तरैक लक्षवर्गमीटर्-परिमितेषु व्याप्तं नूतनं टर्मिनल-भवनम् प्रतिवर्षं त्रीणि-दशमलवोत्तरैक कोटि-यात्रिणां कृते परिकल्पितम् अस्ति। नूतनस्य टर्मिनल्-भवनस्य बहिः एकां जनसभां सम्बोधयन् श्रीमोदी अवदत् यत् केन्द्र-सर्वकारः असम-राज्यस्य विकासाय प्रतिबद्धः अस्ति।

शिवराजसिंह-चौहानः

केन्द्रीयकृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः अवदत् यत्, विकसितभारत् जी. राम जी. विधेयकं न केवलं कृषकाणां श्रमिकाणां च कृते लाभप्रदः अपितु प्रत्येकस्मिन् क्षेत्रे ग्रामाणां विकासेन सह सम्बद्धः अस्ति।

सः ह्यः नवदिल्ल्यां पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य चौधरी-चरण-सिङ्घ-पुरस्कारान् सम्बोधयन् आसीत्। सः सूचितवान् यत् मन्त्रालयः अगामि आय-व्यय-संकल्पना-पत्रस्य षड्विंशत्यधिक द्विसहस्र- सप्तविंशत्यधिक द्विसहस्र वर्षस्य कृते कृषिक्षेत्रे स्थिति-स्थापक-व्यवस्थायाः निर्माणाय विचारान् आमन्त्रयति। श्री चौहानः योजना-निर्माणार्थं कृषकान्, विशेषज्ञान्, कृषिवैज्ञानिकान् च सङ्गृहीतुं चिन्तन्-शिबिरस्य स्थापनायां बलं प्रदत्तवान्।

दिल्ली- वायु प्रदूषणं

वायु- प्रदूषणं निवारणाय दिल्ली-सर्वकारेण ग्रैप-चतुर्थ-चरणस्य अन्तर्गतं स्वस्य-अभियानम् इतोपि सुदृढं कृतम्। पर्यावरणमन्त्रिणा मञ्जीन्दर् सिङ्घ् सिरसा इत्यनेन एतादृशाणां उद्योगाणां निर्माणस्थलानां च विरुद्धं कठोर-कार्या-चरणस्य पूर्वसूचना दत्ता ये प्रदूषणं जनयन्ति। एकस्मिन् वक्तव्ये, राज्यसर्वकारः अवदत् यत् आहत्य द्वादशाधिक षट्शतं यावत् अनुपालन-सन्यन्त्रानि बन्धितानि, तथा च त्रिषु दिनेषु एकलक्षतोप्यधिकानि प्रदूषण-नियन्त्रण-प्रमाण-पत्राणि वितरितानि।

पुरुष - क्रिकेट

ए. सी. सी. पुरुषाणां अण्डर्-19 एशिया चषक विंशति पञ्चविंशति इत्येतस्यां क्रीडायाम, अद्य प्रातः दुबई-नगरस्य आई. सी. सी. अकैडमी-क्रीडाङ्गणे अन्तिमक्रीडायां भारतीय दलं चिरप्रतिद्वन्दिनं पाकिस्तानं सम्मुखी करिष्यति। क्रीडायाः आरम्भः भारतीयसमयानुसारं प्रातः सार्द्धदश वादने भविष्यति।

महिला-क्रिकेट्

महिला-क्रिकेट्-क्रीडायां, अद्य विशाखापत्तनम्-नगरस्य डा. वाई. एस्. राजशेखर-रेड्डी ए. सी. ए.-वी. डी. सी. ए. क्रीडाङ्गणे, पञ्च-क्रीडा-शृङ्खलायाः प्रथमायां विंशति-प्रति-विंशति-अन्ताराष्ट्रिय-क्रीडायां भारतीयदलं श्रीलङ्कादलं सम्मुखी करिष्यति। क्रीडायाः आरम्भ: सायं सप्तवादने भविष्यति।

संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।